# A

**18228** **120 MINUTES**

1. ‘विष्ण इह’ इत्यत्र लोपः कस्य?
   - A) विसर्गस्य
   - B) वकारस्य
   - C) ओकारस्य
   - D) एकारस्य

2. ‘मदोदग्राः ककुद्मन्तः’ इत्यत्र दकारः कथम्?
   - A) यरोऽनुनासिकेऽनुनासिको वा इति सूत्रेण
   - B) तोः षि इति सूत्रेण
   - C) प्रत्यये भाषायां नित्यम् इति वार्तिकेन
   - D) यवादिगणे पाठात्

3. ‘नमस्करोति’ इत्यत्र विसर्गस्य सत्वं केन सूत्रेण?
   - A) नमःपुरसोर्गत्योः
   - B) कस्कादिषु च
   - C) नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च
   - D) इसुसोः सामर्थ्ये

4. ‘प्रत्यग्नि’ इत्यव्ययीभावसमासे प्रतिपदस्य अर्थः कः?
   - A) लक्षणम्
   - B) अभिविधिः
   - C) आभिमुख्यम्
   - D) भागः

5. ‘पौर्वशालः’ इत्यत्र विग्रहः कथम्?
   - A) पूर्वस्यां शालायां भवः
   - B) पौर्वश्चासौ शालश्च
   - C) पूर्वा च इयं शाला च
   - D) पूर्वशालायाः समीपे

6. ‘स्त्रीप्रमाणः’ इत्यस्य विग्रहः कथम्?
   - A) स्त्री प्रमाणं यस्य सः
   - B) स्त्री प्रमाणी यस्य सः
   - C) स्त्रियाः प्रमाणः
   - D) स्त्रियः एव प्रमाणानि

7. ‘आग्नीध्रमुपतिष्ठते’ इत्यत्र परस्मैपदं कुतो न?
   - A) सामीप्यार्थकत्वात्
   - B) मन्त्रकरणार्थकत्वात्
   - C) पूजार्थकत्वात्
   - D) स्थित्यर्थकत्वात्

8. ‘विरमति’ इत्यत्र परस्मैपदं केन सूत्रेण?

A) विभाषाकर्मकात्  B) विपराभ्यां जेः

C) व्याङ्परिभ्यो रमः  D) निगरणचलनार्थेभ्यश्च

9. इदंशब्दस्य पुल्लिङ्गे प्रथमैकवचनं रूपं किम्?

A) इयम्  B) असौ  C) इदम्  D) अयम्

10. ‘मघवन्’ इति शब्दस्य तृतीयैकवचनं किम्?

A) मघवता  B) मघवेन  C) मघोना  D) मघविना

11. ‘अद भक्षणे’ इति धातोः लुङि प्रथमैकवचनं रूपं किम् ?

A) अदात्सीत्  B) आदीत्  C) आदिक्षत्  D) अघसत्

12. ‘वृत्तिसमवायार्थ उपदेशः’ इत्यत्र वृत्तिशब्दस्यार्थः कः ?

A) सूत्रम्  B) व्याख्यानम्

C) उच्चारणम्  D) शास्त्रप्रवृत्तिः

13. ‘सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्’ -अनेन वाक्येनोद्दिष्टं प्रयोजनं किम् ?

A) चत्वारि  B) सारस्वतीम्

C) सुदेवो असि वरुण  D) अविद्वांसः

14. ‘फलेभ्यो याति’ इत्यत्र चतुर्थी केन सूत्रेण ?

A) क्रियार्थोपपदस्य च कर्मणि स्थानिनः

B) तुमर्थाच्च भाववचनात्

C) चतुर्थी सम्प्रदाने

D) तादर्थ्ये चतुर्थी वाच्या

15. ‘क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्’ -इति वार्तिकस्य उदाहरणं किम् ?

A) हरये द्रुह्यति  B) कृष्णाय श्लाघते

C) पशुना रुद्रं यजते  D) पत्ये शेते

16. ‘यञश्च’ इति सूत्रेण कः प्रत्ययः विधीयते

A) टाप्  B) ङीप्  C) इत्  D) ङीन्

17. ‘स्थली’ इत्यस्यार्थः कः ?

A) कृत्रिमा भूमिः B) अकृत्रिमा भूमिः
C) पात्रविशेषः D) भाजी

18. दिक्छब्दस्य षष्ठीबहुवचने रूपं किम् ?

A) दिशानाम् B) दिशम् C) दिशाम् D) दिशोः

19. कस्मादुपसर्गात् परस्य क्षिपधातोः परस्मैपदं भवति ?

A) अधि B) अभि C) वि D) प्रति

20. देवदत्ताय शतं धारयति-अत्र चतुर्थी केन सूत्रेण ?

A) पराजेरसोढः B) धारेरुत्तमर्णः
C) जनिकर्तुः प्रकृतिः D) अकथितं च

21. तर्कसंग्रहन्यायबोधिन्याः कर्ता कः ?

A) दिनकरभट्टः B) अन्नंभट्टः
C) रामरुद्रभट्टाचार्यः D) गोवर्धनः

22. ‘चक्षुर्मात्रग्राह्यो गुणो रूपम्’-अत्र विशेष्यदलस्य प्रयोजनं किम् ?

A) संख्यादौ अतिव्याप्तिवारणाय B) रूपाभावे अतिव्याप्तिवारणाय
C) द्रव्ये अतिव्याप्तिवारणाय D) शिष्याणां सुखावबोधाय

23. द्वितीयक्षणोत्पन्नस्य कर्मणः क्षणव्यवहारोपपादकः उपाधिः कीदृशः ?

A) उत्तरसंयोगावच्छिन्नं कर्म B) स्वजन्यविभागप्रागभावावच्छिन्नं कर्म
C) पूर्वसंयोगावच्छिन्नविभागः D) पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः

24. ‘वह्निरनुष्णः पदार्थत्वात्, जलवत्’-अत्र हेत्वाभासः कः?

A) विरुद्धः B) सव्यभिचारः C) असिद्धः D) बाधितः

25. पीलुपाकवादिनः के ?

A) वेदान्तिनः B) मीमांसकाः C) वैशेषिकाः D) नैयायिकाः

26. संस्कारः कतिविधः?

A) द्विविधः B) त्रिविधः C) चतुर्विधः D) पञ्चविधः

27. 'गौरश्वः पुरुषो हस्ती' इति वाक्यं न प्रमाणम्-कुतः?

A) योग्यताविरहात् B) आकांक्षाविरहात्

C) सन्निधिविरहात् D) तात्पर्याभावात्

28. स्वात्यन्ताभावसमानाधिकरणत्वं किम्?

A) सिद्धान्तव्याप्तिः B) व्याप्यवृत्तित्वम्

C) पूर्वपक्षव्याप्तिः D) अव्याप्यवृत्तित्वम्

29. ईश्वरे सुखदुःखाद्युत्पत्तिः कुतो न सम्भवति?

A) ईश्वरत्वात् B) अदृष्टाभावात्

C) विभुत्वात् D) नित्यत्वात्

30. अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं किम्?

A) आत्मत्वम् B) शरीरत्वम् C) इन्द्रियत्वम् D) ईश्वरत्वम्

31. केषां पक्षे सादृश्यमतिरिक्तः पदार्थः?

A) भाट्टानाम् B) प्राभाकराणाम्

C) वेदान्तिनाम् D) साख्यानाम्

32. परमाणूनां परस्परं भेदकः कः?

A) विशेषः B) अवयवः C) समवायः D) अदृष्टम्

33. तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्-कुत्र?

A) जले B) वायौ C) रूपत्वे D) पृथिव्याम्

34. जात्यादीनां साधर्म्यं किम् ?

A) जातिहीनत्वम् B) अनेकत्वे सति समवायित्वम्

C) कारणत्वम् D) सत्तावत्त्वम्

35. व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनं किम्?

A) उदाहरणम् B) उपनयः C) हेतुवचनम् D) निगमनम्

36. केवलान्वयित्वं नाम किम्?

A) अत्यन्ताभावाप्रतियोगित्वम् B) ईश्वरप्रमाविषयत्वम्

C) सर्वपदाभिधेयत्वम् D) सर्वमूर्तद्रव्यसंयोगित्वम्

37. इतरान्विते शक्तिरिति के वदन्ति?
A) नैयायिकाः B) कौमारिलाः C) प्राभाकराः D) वैयाकरणाः

38. चूर्णादिपिण्डीभावहेतुः गुणः कः ?
A) पृथक्त्वम् B) स्नेहः C) गुरुत्वम् D) द्रवत्वम्

39. रूपवत्वं द्रवत्ववत्वं प्रत्यक्षविषयत्वं च केषां द्रव्याणाम्?
A) जलतेजोवायूनाम् B) क्षित्यब्वायूनाम्
C) क्षित्यप्तेजोवायूनाम् D) क्षित्यप्तेजसाम्

40. 'त्रसरेणोः अवयवाः सावयवाः महदारम्भकत्वात्' इत्यत्र उदाहरणं किम्?
A) कपालवत् B) घटवत्
C) परमाणुवत् D) द्व्यणुकवत्

41. श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः कः?
A) दमः B) तितिक्षा C) शमः D) उपरतिः

42. मनस्तु ......सहितं सन् मनोमयकोशो भवति?
A) प्राणादिभिः B) कर्मेन्द्रियैः C) पृथिव्यादिभूतैः D) ज्ञानेन्द्रियैः

43. प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं किम्?
A) अभ्यासः B) श्रवणम् C) प्रयोजनम् D) योगः

44. अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं नाम किम् ?
A) लयः B) अध्यासः C) विक्षेपः D) कषायः

45. शङ्करनियन्त्रितम् अन्तःकरणं किम्?
A) बुद्धिः B) अहङ्कारः C) चित्तम् D) मनः

46. 'मात्रास्पर्शास्तु कौन्तेय' इत्यादिपद्ये मात्रापदस्य कोऽर्थः?
A) परिमाणम् B) क्षणः C) केवलम् D) इन्द्रियवृत्तिः

47. 'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते'-कुत्र?
A) भक्तियोगे B) निष्कामकर्मयोगे
C) लोके D) ज्ञानयोगे

48. का बुद्धिः समाधौ न विधीयते ?

A) व्यवसायात्मिका B) अव्यवसायात्मिका

C) कर्मप्रवणा D) त्रैगुण्यविषया

49. बुद्धिनाशः कस्मात् सम्भवति?

A) कामात् B) क्रोधात्

C) सङ्गात् D) स्मृतिभ्रंशात्

50. 'एष वोऽस्त्विष्टकामधुक्'-अत्र इष्टकामधुक् कः?

A) कामः B) परमात्मा C) यज्ञः D) संसारः

51. Match the following:

| **List I** | **List II** |
|---|---|
| a. Panini | 1. Ashtadhyayi |
| b. Annambhatta | 2. Kavyaprakasa |
| c. Sadananda | 3. Tharkasamgraha |
| d. Mammatabhatta | 4. Vedantasara |

A) a-2, b-1, c-3, d-4 B) a-4, b-2, c-3, d-1

C) a-3, b-2, c-1, d-4 D) a-1, b-3, c-4, d-2

52. किमन्तरेण प्रमाणप्रवृत्तिः नास्ति?

A) ज्ञानम् B) प्रमातृत्वम् C) इन्द्रियाणि D) आत्मानम्

53. 'अथातो ब्रह्मजिज्ञासा' इत्यत्र अतःशब्दस्य कोऽर्थः?

A) आरम्भः B) आनन्तर्यम् C) मङ्गलम् D) हेतुः

54. भूतवस्तुविषयाणां प्रामाण्यं कीदृशम् ?

A) वस्तुतन्त्रम् B) पुरुषतन्त्रम् C) शास्त्रतन्त्रम् D) चोदनातन्त्रम्

55. 'सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति'-का?

A) माया B) कर्तव्यबुद्धिः C) अभावबुद्धिः D) ब्रह्मबुद्धिः

56. 'तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः'-कस्य?

A) विज्ञानवतः B) कर्मयोगिनः C) अविज्ञानवतः D) स्थिरधियः

57. 'गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत'-का?

A) बुद्धिः B) माया C) देवता D) अदितिः

58. 'दूरमेते विपरीते विषूची'-अत्र विषूचीपदस्यार्थः कः?

A) रोगविशेषः B) अभिन्नफले C) नानागती D) अव्यक्ते

59. अव्यक्तात् परः कः?

A) पुरुषः B) महान् C) बुद्धिः D) अर्थः

60. तयोः किम् आददानस्य साधु भवति?

A) प्रेयः B) श्रेयः C) भक्तिः D) ज्ञानम्

61. Which is the *sūkta* that belongs to the end of the tenth Mandala of *Rgveda*?

A) *Vivāhasūkta* B) *Samvadasūkta*
C) *Purushasūtkta* D) *Kitavasūkta*

62. Match the following:

| **List I** | **List II** |
|---|---|
| a. Soundaryalahari | 1. Narayana Bhattathiri |
| b. Narayaneeyam | 2. Sankaracharya |
| c. Mukundamala | 3. Kulasekhara Varma |
| d. Nirvṛthipanchakam | 4. Sree Narayanaguru |

A) a-2, b-1, c-3, d-4 B) a-1, b-3, c-4, d-2
C) a-4, b-2, c-1, d-3 D) a-2, b-4, c-1, d-3

63. Who is the author of *Tilakamanjari* ?

A) Dhanapala B) Vamanabhatta
C) Dhanika D) Banabhatta

64. How many letters are there in *Jagati chandas*?

A) 10 B) 19 C) 12 D) 14

65. Select the particular metre in which there are 17 letters?

A) स्रग्धरा B) शार्दूलविक्रीडितम्
C) मालिनी D) शिखरिणी

66. Who is the author of *Janakiharana* ?
A) Bhatti B) Kalidasa C) Kumaradasa D) Pravarasena

67. The author of *Madhyamanayanaprakara* is .....
A) Neelakantha Somayaji B) Paramesvara of Vatassery
C) Putumana Somayaji D) Madhava of Sangamagrama

68. शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः-The alamkara of this sentence?
A) काव्यलिङ्गम् B) व्यतिरेकः C) अप्रस्तुतप्रशंसा D) अतिशयोक्तिः

69. Which one is the example of स्वरूपोत्प्रेक्षा?
A) धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।
B) प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।
C) त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी।
D) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।

70. Who was the first curator of the Oriental Manuscripts Library, Trivandrum?
A) Sambasivasastry B) Ulloor Paramesvar Iyyar
C) T.Ganapati Sastry D) Dr. K. Raghavan Pillai

71. The South African Languages belong to which family of languages?
A) Ural Altaic B) Bantu
C) Malayo Polynesian D) Semitic

72. *Nepali* language is derived from which spoken dialect of Sanskrit?
A) अर्धमागधी B) शौरसेनी C) मागधी D) पैशाची

73. What is the name of the semantic change in which the sense of a word and the veiled expression is disagreeable?
A) Association B) Pejoration C) Expansion D) Elevation

74. Read the following statements and answer the questions:
1. Kalidasa is the author of three dramas.
2. Bhasa composed thirteen dramas.

A) Both the statements are wrong
B) Statement 1 is correct and statement 2 is wrong
C) Both the statements are correct
D) Statement 1 is wrong and statement 2 is correct

75. Among the following statements, which statement/statements is/are correct?
1. There are four vedas and six vedangas.
2. There are six Vedas and four vedangas.
3. There are ten varieties of dramas in Sanskrit.

A) Only 1 is correct B) Only 2 is correct
C) Only 1 & 3 are correct D) Only 2 & 3 are correct

76. Who is the author of *Keralodaya*?
A) Prof. N. Gopala Pillai B) Dr. P.K.Narayana Pillai
C) Dr. K.N.Echuttachan D) Sri. Mutukulam Sreedhar

77. *Silparatna* of Sreekumara belongs to which centuary?
A) 19 Cent.A.D. B) 16 Cent.A.D.
C) 11 Cent.A.D. D) 8 Cent.A.D.

78. *Darsanamala* was written by whom?
A) Chattampiswamikal B) SreeNarayanaguru
C) Sankaracharya D) Tapovanaswamikal

79. Read the following statements and answer the questions.
1. There are six branches in Indian Philosophy.
2. Only five literary compositions are considered as Mahakavyas.

A) 1 is correct and 2 is wrong
B) 1 and 2 are correct
C) 1 and 2 are wrong
D) 1 is wrong and 2 is correct

80. Who explained the exceptions of Grimm's Law?
A) Verner B) Grassmann C) Burrow D) Coldwell

81. 'भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज'-कः?
A) सिंहः B) दिलीपः C) वसिष्ठः D) लोकः

82. 'अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना'-का?
A) सुदक्षिणा B) अरुन्धती C) नन्दिनी D) कामधेनुः

83. 'ईशाणिमैश्वर्यविवर्तमध्ये
लोकेशलोकेशयलोकमध्ये'-अत्र प्रथमपादेन विवक्षितोऽर्थः कः?

A) प्रपञ्चमध्यम् B) कृशोदरी C) राजा D) हंसः

84. Read the following statements and answer the questions.
1. Harshacharitam is composed by Banabhatta.
2. Harshacharitam is composed by Sri Harsha.

A) 1 is correct and 2 is wrong
B) 1 is wrong and 2 is correct
C) 1 and 2 are wrong
D) 1 and 2 are correct

85. Match the following:

| **List I** | **List II** |
|---|---|
| a. Dhwani School | 1. Kshemendra |
| b. Vakrokti School | 2. Mahima Bhatta |
| c. Auchitya School | 3. Kunthakan |
| d. Anumithi School | 4. Anandavardhana |

A) a-3, b-1, c-2, d-4 B) a-4, b-3, c-1, d-2
C) a-2, b-3, c-1, d-4 D) a-2, b-4, c-3, d-1

86. 'तस्याङ्गानां प्रभेदा ये प्रभेदाः स्वगताश्च ये'-अत्र तच्छब्देन कः परामृश्यते?
A) शब्दशक्तिमूलध्वनिः B) अत्यन्ततिरस्कृतवाच्यध्वनिः
C) अलक्ष्यक्रमव्यङ्ग्यध्वनिः D) संलक्ष्यक्रमव्यङ्गध्वनिः

87. 'आयुरेव इदम्' इत्यत्र कीदृशी लक्षणा?
A) गौणसाध्यवसाना B) शुद्धसाध्यवसाना
C) गौणसारोपा D) शुद्धसारोपा

88. निरुपादानसम्भारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने।।-अत्र कः अलङ्कारः व्यज्यते?
A) विरोधः B) उपमा
C) व्यतिरेकः D) अप्रस्तुतप्रशंसा

89. Match the following:

| **List I** | **List II** |
|---|---|
| a. Upamalankara | 1. Vishesha |
| b. Utprekshalankara | 2. Abhetha |
| c. Rupakalankara | 3. Sambhavana |
| d. Vythirekalankara | 4. Saḍṛsyam |

A) a-4, b-2, c-3, d-1 B) a-3, b-4, c-1, d-2
C) a-4, b-3, c-2, d-1 D) a-1, b-3, c-2, d-4

90. 'यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति'-कुत्र?
A) पदवक्रतायाम् B) वाक्यवक्रतायाम्
C) प्रत्ययवक्रता D) वर्णवक्रतायाम्

91. बन्धुस्नेहो नु पापस्य जन्मनः प्रभुता नु मे।
अपहसितसद्वृत्तं यन्मयेदमनुष्ठितम्।।-क एवं वदति?
A) मारीचः B) रामः C) लक्ष्मणः D) रावणः

92. सुखाभिलाषी स्त्रीभावो दुर्विनीताश्च राक्षसाः।
दूरे वयमतो देव्याः परीक्ष्या भावशुद्धता।।-लक्ष्मणस्येदं वाक्यं कस्मिन् अङ्के वर्तते?
A) पञ्चमे B) षष्ठे C) द्वितीये D) सप्तमे

93. हते राज्ये भवान् भक्त्या प्रत्याचष्टे स्वमातरम्।
अहो सन्तोषबाह्यानामधर्मैकरसं मनः।।-अत्र अलङ्कारः कः?
A) परिणामः B) अप्रस्तुतप्रशंसा
C) अर्थान्तरन्यासः D) काव्यलिङ्गम्

94. Read the following statements and answer the questions.
1. Banabhatta composed KADAMBARI
2. KADAMBARI had been completed by Annambhatta

A) 1 and 2 are wrong B) 1 is wrong and 2 is correct
C) 1 and 2 are correct D) 1 is correct and 2 is wrong

95. 'किञ्चित् करोति भुजगस्य विचेष्टितानि'-किम्?
A) पद्मावती B) सारसपङ्क्तिः
C) उज्जयिनी D) तोरणमाला

96. पद्मावती स्वामिनो देवी भविष्यतीति कैरादिष्टम्?

A) मुनिभिः B) पुष्पकभद्रादिभिः

C) यौगन्धरायणादिभिः D) महासेनादिभिः

97. 'पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु'-किम् ?

A) रेणुः B) वर्षः C) आतपः D) प्रकाशः

98. 'सोऽयं न पुत्रकृतकः पदवीं मृगस्ते'-अत्र परामृष्टः कः?

A) शारद्वतः B) कश्यपः C) दीर्घापाङ्गः D) शाङ्र्गरवः

99. 'प्रायः स्वं महिमानं कोपात् प्रतिपद्यते हि जनः'-क एवं वदति?

A) राजा B) काञ्चुकीयः C) कश्यपः D) मातलिः

100. आश्चर्यचूडामणौ कस्याङ्कस्य अशोकवनिकाङ्क इति नामधेयम्?

A) षष्ठस्य B) पञ्चमस्य C) चतुर्थस्य D) सप्तमस्य

101. कस्य मूर्तित्वे रविः परिकल्प्यते?

A) चन्द्रस्य B) कुजस्य C) गुरोः D) मन्दस्य

102. गुरोः उच्चराशिः कः?

A) वृश्चिकः B) कर्कटकः C) मकरः D) मीनः

103. कन्याराशौ आदिमः नवांशः कः?

A) कन्या B) तुला C) मेषः D) मकरः

104. अधोनिर्दिष्टेषु उभयोदयराशिः कः?

A) मिथुनः B) वृषभः C) तुला D) मीनः

105. 'तौक्षिक' इति कस्य राशेः नामधेयम्?

A) वृश्चिकस्य B) तुलायाः C) धनुषः D) कन्यायाः

106. संवत्सरकारकत्वं कस्य ग्रहस्य?

A) कुजस्य B) मन्दस्य C) गुरोः D) शुक्रस्य

107. कुजस्य शत्रुग्रहः कः?

A) बुधः B) मन्दः C) चन्द्रः D) गुरुः

108. बृहत्तनुः ग्रहः कः?

A) बुधः B) रविः C) गुरुः D) मन्दः

109. बुधग्रहस्य स्वामी कः?

A) कुमारः B) इन्द्रः C) अग्निः D) विष्णुः

110. अधोनिर्दिष्टेषु अन्नभं किम्?

A) भरणी B) आश्लेषा C) अनूराधा D) विशाखा

111. अधोनिर्दिष्टेषु गण्डान्तदोषः कस्मिन् नक्षत्रे सम्भवति?

A) रेवती B) चित्रा C) कृत्तिका D) ज्येष्ठा

112. 'तत्र तु हरिवासरो वर्ज्यः।' कुत्र?

A) विद्यारम्भे B) गृहारम्भे C) विवाहे D) अन्नप्राशे

113. विद्यारम्भे वर्जनीयः वासरः कः?

A) सोमवासरः B) रविवासरः C) मन्दवासरः D) कुजवासरः

114. 'वर्ज्यः सुखे खेचरः'-कस्मिन् कर्मणि?

A) विवाहे B) गृहारम्भे C) विद्यारम्भे D) उपनयने

115. अधोनिर्दिष्टेषु साध्यायतिथिः का?

A) अष्टमी B) नवमी C) प्रतिपत् D) चतुर्दशी

116. मेषराशेः गरलद्रेक्काणं किम्?

A) तृतीयद्रेक्काणः B) प्रथमद्रेक्काणः

C) द्वितीयद्रेक्काणः D) गरलद्रेक्काणः नास्ति

117. वराहमिहिरेण कृतः संहिताग्रन्थः कः?

A) शार्ङ्गधरसंहिता B) बृहत्संहिता

C) भद्रबाहुसंहिता D) चरकसंहिता

118. जातकसारावल्याः कर्ता कः?

A) कमलाकरः B) कल्याणवर्मा C) लल्लः D) केशवः

119. आर्यभटीयस्य भाष्यकारः कः ?

A) नीलकण्ठसोमयाजी B) ब्रह्मगुप्तः

C) श्रीपतिः D) भास्कराचार्यः

120. अधोनिर्दिष्टेषु गणेशकृतः ज्योतिषग्रन्थः कः?

A) ताजिकभूषणम् B) लीलावती

C) पञ्चसिद्धान्तिका D) सिद्धान्तशेखरः।